# किमसौ न भयङ्करः



हिमालयस्य सानुप्रदेशे एकस्मिन् गह्वरे शतशः वनाजाः स्वैरम् अवसन्।
ततः नातिदूरे कश्चन शृगालः तस्य पत्नी च अवसताम्
एकदा शृगालः कौशलेन एकम् अजं गृहीत्वा पत्न्या साकम् अभक्षयत्।
अजमांसं भुक्त्वा तौ तुष्टौ अभवताम्।
सः स्वकौशलेन प्रतिदिनम् एकैकम् अजं हन्तुं प्रारभत
क्रमेण अजानां संख्या न्यूना जाता।
अजानां मध्ये एका बुद्धिमती आसीत्।
शृगालः बहुवारं तां ग्रहीतुं प्रयत्नमकरोत्। सा तु स्वबुद्धिवैभवेन सर्वदा रक्षां प्राप।
एकस्मिन् दिने शृगालः पत्नीमाहूय ताम् अजां ग्रहीतुम् उपायमेकम् अवदत्।
उपायं श्रुत्वा शृगालभार्या अजायाः समीपम् अगच्छत्। भर्तुः निर्देशैनुसारं सर्वम् अकथयत्।
अजा प्रत्यवदत्।
प्रिये मम बान्धवाः सर्वे भवत्याः भर्त्रा मारिताः। अतः अहं त्वया सह नागच्छामि
शृगालभार्या अवदत्।
मा भैषीः, मम भर्ता मृतवान्। पुनः भयं कुतः ? सधैर्यम् आगच्छत।
तच्छ्रुत्वा अजा अवदत्।
भवत्याः भर्ता कुटिलचित्तः अस्ति, अतः निश्चयेन अहं नागच्छामि।
बहुवारं तस्याः याचनां श्रुत्वा अजा एवम् अचिन्तयत्।
प्रायः एतस्याः वचनं सत्यं स्यात्। सः निश्चयेन मृतवान् भवेत्।
एवं मनसि विचार्य सा तया सह गन्तुं निश्चिकाय।
मध्येमार्गं सा अजा पुनः अचिन्तयत्।
को जानाति किं भविष्यतीति।
संशयग्रस्था सा शृगालभार्या अग्रे गन्तुं प्रेरयामास।
भार्यायाः अजायाश्च पदनिस्वनं श्रुत्वा अक्षमः शृगालः शिरः उत्थाप्य परितः अवालोकयत्।







दुर्जन प्रियवादी च नैव विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हालाहलम् ।।
( चाणक्यशतकम्)

रमेष्.एच् , जि.एम्.एम्.जि.एच्.एस्, पालक्काद्